# संस्कृतवार्ता:

**दिनाङ्क :-26.10.2024**

**प्रात: - 06:55**

**<u>जर्मनदेशीय: - शासनाध्यक्ष:</u>**

प्रधानमन्त्री नरेन्द्रमोदी जर्मनीदेशीय: शासनाध्यक्ष: ओलाफ्-शोल्ज़ इत्येष: च ह्य: नवदिल्ल्यां सप्तमस्य अन्तासर्वकारीय-परामर्शस्य आई.जी.सी. इत्येतस्य सम्मेलनस्य सहाध्यक्षतां कृतवन्तौ। आई.जी.सी. इति एका सम्पूर्ण-सर्वकारीय-संरचनास्ति यस्या: अन्तर्गतं उभयो: देशयो: मन्त्रिण: स्वलक्षितेषु कर्तव्ययुतक्षेत्रेषु चर्चां कुर्वन्ति इति अपि च विचारविर्मशानां परिणामा: प्रधानमन्त्रिणे शासनाध्यक्षाय च प्रस्तुवन्ति।

भारत-जर्मनी-देशयोः मध्ये ह्यः द्विपक्षीयसम्बन्धान् वर्धयितुं हरितहाइड्रोजन, नवीन-प्रौद्योगिक्यादि बहुविध सन्धि पत्राणि च हस्ताक्षरितानि। प्रतिनिधिमण्डलस्तरस्य वार्तायां नवदिल्ल्यां प्रधानमन्त्री नरेन्द्रमोदी-जर्मन-शसनाध्यक्षः ओलाफ् श्कोल्ज् इत्येतयोः उपस्थितौ सन्धि पत्राणां आदान-प्रदानं जातम्।

भारत-जर्मनी-देशयोः मध्ये गोपनीयसूचनायाः आदानप्रदानस्य परस्परसंरक्षणस्य च विषये सहमतिः अपि अभवत्। उभौ राष्ट्रौ नवीनतायाः प्रौद्योगिक्याः च सह भारत-जर्मन-हरित-हाइड्रोजन-रूपरेखायाः कृते अपि स्वप्रतिबद्धतां प्रकटितवन्तौ। अपराधविषयेषु परस्परं विधिसहायतायाः सन्धिपत्रे तौ हस्ताक्षरं कृतवन्तौ। भारत-जर्मनी-देशयोः मध्ये कौशलविकासस्य व्यावसायिकशिक्षाप्रशिक्षणस्य च क्षेत्रे सहकार्यस्य विषये अपि ज्ञापनपत्रे हस्ताक्षरं जातम्। वार्ताहरान् सम्बोधयन् प्रधानमन्त्री नरेन्द्रमोदी युक्रेन-पश्चिम-एशिया-देशयोः मध्ये प्रचल्यमाणे संघर्षे -पुनर्शान्तिस्थापनाय भारतस्य प्रतिबद्धतां पुनः उक्तवान् सः अवदत् यत् भारतं सदैव वदति यत् युद्धेन समस्यानां निवारणं कर्तुं न शक्यते।

श्रीमोदी अवदत् यत् अद्य भारतं विविधीकरणस्य, सङ्कट-निवारणस्य च बृहत्तमं केन्द्रं जायमानम् अस्तीति। सः इदमपि अवदत् यत् भारत-प्रशान्तक्षेत्रं विश्वस्य भविष्यस्य कृते अतीवमहत्त्वपूर्णमस्ति इति। जर्मन-व्यापारस्य अष्टादशमे एशिया-प्रशान्तसम्मेलने निजभाषणसमये जर्मनदेशीयः शासनाध्यक्षः ओलाफ् शोल्ज़-इत्येसौ प्रोक्तवान् यत् भारतं विश्वस्य बृहत्तमं लोकतन्त्रं, द्रुतगत्या वर्धमाना प्रमुखा अर्थव्यवस्थापि अस्ति, अनेन भारत-जर्मनी-देशयोः मध्ये समन्वयं वर्धयितुं अपि बलं दत्तम् ।

भारत इटली देशौ सुरक्षितं सरलं च साइबरक्षेत्रं संवर्धयितुं स्वसंस्थानयोः मध्ये सहकार्यं वर्धयितुं सहमतौ जातौ। ह्यः नवदिल्ल्यां उद्घाटनसाइबरसंवादस्य समये उभौ पक्षौ साइबर समाह्वानानां परिदृश्यस्य, राष्ट्रियसाइबर-रणनीतीनां च विषये विचाराणां आदानप्रदानं कृतवन्तौ। तौ महत्त्वपूर्णसूचनासंरचना रक्षणेषु क्षमतानिर्माणपरिकल्पनातन्त्रेषु च चर्चा कृतवन्तौ।

## <u>रेलवे-विशेषयानानि</u>

आगामिनं दीपावली पर्व-छठपूजोत्सवं च अभिलक्ष्य यात्रिसम्मर्दं दूरीकर्तुं अद्यारभ्य आगामिमासस्य सप्तमं दिनाङ्क पर्यन्तं रेलमन्त्रालयेन विशिष्ट रेलयानानां पञ्चनवत्यधिकैकशतं यावत् अतिरिक्त प्रचालनं क्रियते। एतेषां रेलयानानां परिचालनं मुख्यतया राष्ट्रीयराजधान्याः नई दिल्ली, आनन्द-विहार, रेलस्थात्राभ्यां देशस्य पूर्वीय क्षेत्राणां कृते क्रियते।

## <u>क्रिकेट</u>

क्रिकेट प्रतिस्पर्धायाम् न्यूजीलैण्ड दलेन ह्यः पुणेनगरे भारतं विरुध्य द्वितीय-निकषस्पर्धायाः द्वितीये पर्याये पञ्चक्रीडकानां हानिपुरस्सरं अष्टनवत्यधिकैकशतं धावनाङ्काः निर्मिताः। अतिथिदलं साम्प्रतं एकाधिक त्रिशतं धावनाङ्कैः अग्रत्वं भजते।